(वेदविज्ञानम्)

# सप्तप्राणात्मकम् अध्यात्मसंस्थानम्

**डॉ. रामदेव साहू**
प्रोफेसर (वेदविज्ञानम्)
विश्वगुरुदीप आश्रम शोध संस्थानम्, जयपुरम्

अध्यात्मसंस्थानंसप्तविध प्राणात्मकं भवति। इमे सप्त प्राणाः चतुर्ण्णाम् इन्द्रियाणां स्वतन्त्रविभागेन सम्बद्धाः सन्ति। इमानि चत्वारि इन्द्रियाणि सन्ति-वाक्, प्राणः, चक्षु, श्रोत्रञ्चेति। एषु वागिन्द्रियानुगतः मुखप्राणः घ्राणेन्द्रियानुगतं नासाप्राणद्वयं चक्षुरिन्द्रियानुगतं चक्षुष्प्राणद्वयं, क्षोत्रेन्द्रियानुगतं श्रोत्रप्राणद्वयञ्च विज्ञेयाः। नासाप्राणः चक्षुष्प्राणः श्रोत्रप्राणश्च त्रय एते यमजप्राणाः सन्ति। अतएव प्राणिशरीरे नासापुटद्वयं चक्षुर्द्वयं श्रोत्रद्वयं च जायन्ते। मुखप्राणस्य यमजत्वाभावान्मुखमेकमेव। एवमेते सप्तविधप्राणाः साकञ्जप्राणा उच्यन्ते। इमे प्राणा देवजाः सन्ति अर्थात् देवेभ्य इमे समुत्पन्नाः। एषु प्रथमो मुखप्राणः वागिन्द्रियस्याधिष्ठानभूतः। स चाग्निना समुत्पन्नः। अतएव शतपथब्राह्मणे सम्प्रोक्तम्- 'अग्निर्वै वाग्' इति।

गोपथब्राह्मणमप्यस्य समर्थनं करोति। तत्र चेदमप्युक्तं यत् 'या वाक् सोऽग्नि' रिति। एतरेय आरण्यकमपि प्रकारान्तरेण अस्यैव तथ्यस्य समर्थनं करोति। अग्निः प्राणिशरीरस्थे सौरप्राणे विद्यमानो भवति अतः वाचा सह तस्य नियत सम्बन्धो नित्यसम्बन्धो वा मन्तव्यः। वाक् च सौरप्राणश्च उभौ यदा मिथुनीभावं प्राप्नुतस्तदा 'मनस्' इति अतिविशिष्टं तत्त्वं अन्तःकरणस्याधाररूपमुत्पद्येते। वाचो मिथुनीभावादेव मुखमिन्द्रियमेकं सदपि कार्यद्वयं सम्पादयति शब्दोच्चारणस्य अशनपानादेश्च। वागग्निः प्राणिनां वाचं वितनोति। एवमेव च या वैश्वानराग्नेः प्रतिरूपभूता वागस्ति, सैव भोजनादान विसर्गयोः प्रक्रियां सम्पादयति।

नासाप्राणः घ्राणेन्द्रियस्याधिष्ठानभूतः। स चाश्विभ्यां समुत्पन्नः। प्राणिनां श्वासोच्छवासरूपे नासाप्राण एव गतिं करोति। अश्विनौ युग्मदेवतारौ अभिमतौ अतएव नासाप्राणोऽपि युग्मरूपेणाविर्भवति। तत्रैको नासाप्राणः दक्षिणनासापुटेन अपरश्च वामनासापुटेन सक्रियौ भवतः। अयं उभयविध नासाप्राणः श्वासाय आयामं प्रददाति। शरीरान्तर्वर्त्तिनः पञ्चप्राणाः प्राणापानोदानसमानव्यानाख्याः अपि अनेन युग्मनासाप्राणेन उपकृता भवन्ति। यतो हि एतत्समानान्तरमेवैतेषां सक्रियता सम्भवति।

चक्षुष्प्राणो नेत्रेन्द्रियस्याधिष्ठानभूतः। स सूर्यचन्द्राभ्यां समुत्पन्नः। अनयो: सूर्यचंद्रयोः सूर्य: प्रकाशनशक्ते: प्रदाताऽस्ति, चन्द्रः पुनः सूर्यश्च सूर्यस्वचन्द्रस्योष्मणः अपवर्जनं करोति। देवद्वयोत्पद्यमानत्वाच्चक्षुष्प्राणोऽपि यमजप्राण एव। अयमपि दक्षिणचक्षुषा वामचक्षुषा च सक्रियो भवति। चन्द्रमसा ऊष्मणोऽपवर्जनाच्चक्षुष्प्राणो जलवाष्पमयो भवति। रुदनादिक्रियासमकालं पुनरिदमेव जलवाष्पं अश्रुरूपेण बहिर्निस्सारयति।

श्रोत्रप्राण: कर्णेन्द्रियस्याधिष्ठानभूतः। अयं मातारिश्वसा समुत्पन्नः। प्राणिनां श्रवणशक्तेरयमेव प्रदाता। मातरिश्वा सौरप्राणं द्विधा विभनक्ति। सौरप्राणस्य तौ द्वावेव भागौ श्रोत्रप्राणमुत्पादयतः। द्वाभ्यां जायमानत्वादयमपि क्षोत्रप्राणो यमजप्राण: किन्तु अधिदेवो मातरिश्वा त्वेक एव तस्मादुभयोरपि कर्णयो: कार्यं त्वेकमेव श्रवणमिति। एवमध्यात्मसंस्थाने प्राणिनां प्रथमायां शिरोगुहायां विद्यमाना: सप्त साकंजप्राणा वेदविज्ञानवेत्तृभि: प्रतिपादिताः सन्ति। एते पुनः शिरोगुहातिरिक्तम् उरो गुहायां उदरगुहायां वस्तिगुहायां चापि क्रियान्विताः भवन्ति।

एषां सप्त साकञ्जप्राणानां द्वितीय: प्रस्तार उरोगुहायां लक्ष्यते। उरोगुहाया: सप्तविध साकञ्जप्राणा अपि क्रमशो मनस् हस्तौ रसना घ्राणश्चेति चतुर्णामिन्द्रियाणां स्वतन्त्रविभागेन सम्बद्धा: सन्ति। एषु मनोऽनुगतः हृदयप्राणः हस्तानुगतौ हस्तप्राणौ, रसनानुगतौ स्तनप्राणौ, घ्राणानुगतौ च फुफ्फुसप्राणौ सम्प्रोक्तौ। हृदयप्राणं वर्जयित्वा शेषाः सर्वे प्राणा: यमजा एव भवन्ति। इमे अपि देवजप्राणा उच्यन्ते। एषु प्रथमो हृदयप्राण: मनसः अधिष्ठानमुक्तम्। अयं इन्द्राविष्णूभ्यां समुत्पन्नः अतएवास्य देवतारौ इन्द्राविष्णू भवतः। इन्द्रस्य शक्त्या अयं हृदयप्राणः रुधिरस्य संग्रहणं विदधाति, विष्णोश्च शक्त्या रुधिरं प्रसारयति। इन्द्रस्य सौरप्राणत्वात् हृदयस्य सक्रियता नैरन्तर्यमाप्नोति। सैव चैतन्यमाध्यमेन जीवनक्रियां सञ्चालयति।

हस्तप्राण: हस्तयोरधिष्ठानभूतः कथितः। अयं हि हस्तप्राण इन्द्राग्नीभ्यां समुत्पन्नः। इन्द्राग्नी यदा हिरण्यगर्भेण संपृक्तौ भवतस्तदाऽस्य हस्तप्राणास्याविर्भावो भवति। इन्द्रप्राणस्य संसर्गादयं हस्तप्राण: आदानं कर्म सम्पादयति। एवमेवाग्नेश्च संसर्गात्पोषणादिकर्माणि अनेन हस्तप्राणेन सम्भाव्यन्ते। रसनाख्य: प्राणः उभयोः स्तनयोरधिष्ठानमस्ति। अस्य देवतारौ सोमपरमेष्ठिनौ स्तः। सोमसंपृक्तेरयं प्राणः रसस्य घनीभावं करोति। परमेष्ठिनश्च संसर्गान्मूर्तिमान् (रूपवान्) भवति। सूर्यबृहस्पतिभ्यां समुत्पन्नौ वाजप्राणोऽप्यनेनैव रसनाप्राणेन संपृक्तो भूत्वा प्राणिशरीरे जठराग्निमुद्दीपयति। इदमस्य रसना प्राणस्यानंतरीयं कर्म।

फुफ्फुसप्राणस्याधिष्ठानं घ्राणेन्द्रियमुक्तम्। अयं हि फुफ्फुसप्राण: वरुणेन्द्राभ्यां समुत्पन्नौ वर्त्तते। इन्द्रप्राणेन युक्तो हि ऐन्द्रवायु: दक्षिणफुफ्फुसं सक्रियं करोति। एवमेव वरुणप्राणेन युक्तो वारुणवायुः वामफुफ्फुसं सक्रियं करोति।

इमावुभौ वायू इडापिंगलाभ्यां नाडीभ्यामपि सम्बद्धौ भवतः। अनयोर्यो वारुणवायुः स इडया सम्बद्धो भवति, यश्च ऐन्द्रवायुः सः पिंगलया सम्बद्धो भवति। यद्यपि वरुणेन्द्राविमौ मिथो विरोधित्वमापन्नौ स्तस्तथापि श्वासोच्छवासक्रियायामनयोर्विरुद्धत्वं प्राणिनां कृते महदुपकारि विज्ञेयम्। तथा हि अनयोर्गतिरुभयो र्विरुद्धत्वादेव श्वासोच्छवासक्रियारूपेण लक्षिता भवति।

साकञ्जप्राणानां तृतीय: प्रस्तारः उदरगुहायां भवति। उदरगुहायां विद्यमाना: सप्त प्राणा अपि वाक् मनस घ्राण उपस्थ इत्येतेषां चतुर्णाम् इन्द्रियाणां स्वतन्त्रविभागेन सम्बद्धा भवन्ति। इमे अपि प्राणा देवजा उक्ताः। एषु वागनुगतो नाभिप्राणः, मनोनुगतो यकृत्प्राणः, घ्राणानुगतः क्लोमप्राणः, उपस्थेन्द्रियानुगतो वृक्कप्राणः भवति। नाभिप्राण: वाच एवाधिष्ठानभूतः। परावाच आश्रयोऽयमित्यपि कैश्चिदुक्तम्। वायोरालम्बनेनायं प्राणः परां वाचमूर्ध्वं प्रसारयति। अयं च बृहस्पतिना समुत्पन्नः अतएवास्य देवता बृहस्पतिरस्ति। अयमेव वाचं नाभितो हृदये, हृदयतः कण्ठे, कण्ठतो मुखे प्रणयति। नाभौ या वाक् सा परेत्युच्यते। हृदये या वाक् सा पश्यन्तीत्युच्यते। कण्ठे या वाक् सा मध्यमेत्युच्यते। मुखे इयमेव वाक् वैखरीरूपेणोच्चरिता भवति।

यकृत्प्राणो मनसोऽधिष्ठानभूतः। एवञ्च मनसोऽयमेव परमाश्रय:। यदन्नं प्राणिनो भुञ्जते अथवा च यत्पेयं प्राणिन: पिबन्ति, तदीयं रससर्वस्वमयं यकृत्प्राण एव आकर्षति। अयमपि यमजप्राण:। यमेन्द्रावस्य देवतारौ स्तः। आदित्यप्राणेनेन्द्रेण संपृक्तत्वादयं यकृत्प्राणः रसमादत्ते, यमसंपृक्त्या च पुनः तं संयतं करोति। एवञ्चान्नरसस्य संयमनं यकृत्प्राणस्य कार्यमस्ति। इन्द्रस्य वैश्वानरसंसर्गादयमेव जठराग्निमपि दीपयति तथैव च यमसंसर्गात्तं नियम्यति। एवञ्चायं द्विधा कार्यं कुरुते।

क्लोमप्राणोऽपि घ्राणेन्द्रियस्याधिष्ठानं कथितम्। अस्य देवतारो मरुत: सन्ति। मरुद्गणा वायुसम्पीडनं कुर्वन्ति येन सक्रियो भूत्वाऽयं क्लोमप्राण: फुफ्फुसद्वये संकोचविस्तारयोः प्रक्रियां सञ्चालयति। एतद्वशादेव श्वसनतन्त्रं प्रायः सक्रियं तिष्ठति। उपस्थेन्द्रियानुगतो वृक्कप्राण उपस्थस्यैवाधिष्ठानमभिमतम्। अस्य देवतारौ यमवरुणौ स्तः। एतौ यमवरुणौ एतदीयं कार्यं भुक्तान्नस्य परिशोधनं सम्पादयत:। इमावादौ वृक्कप्राणेन गृहीतं भुक्तान्नस्य प्रवर्ग्यभूतं रसभागं शोधयत:। येन स: भुक्तान्नप्रवर्ग्यो रस: मूत्ररूपे परिणतो भवति। यमवरुणावेव अपानवायो: संसर्गा देनं मूत्राशयं प्रणयत:।

साकञ्जप्राणानां तुरीय: प्रस्तारो वस्तिगुहायां भवति। वस्तिगुहायाः सप्तविधप्राणा अपि पायुपादोपस्थमनसां चतुर्णामिन्द्रियाणां स्वतन्त्रविभागेन सम्बद्धा भवन्ति। इमे अपि देवजप्राणा उच्यन्ते। एषु पाखय्वनुगतः गुदप्राणः,

पादानुगतः श्रोणीप्राण:, उपस्थेन्द्रियानुगतौ योषावृषाप्राणौ, मनोऽनुगतः शुक्रप्राणश्च विज्ञातव्या: । गुदप्राणः पायुरिन्द्रियस्याधिष्ठानभूतः । अयं हि गणपतिना समुत्पन्नः । गणपतिरेवास्य देवता। अतएवायं गणपति प्राण इत्यप्युच्यते।

अयमेव गुदप्राणो गणपतिप्राणो वा भुक्तान्नस्य नीरसं प्रवर्ग्यम् आदत्ते, तस्य शोधनं करोति । अनेन तत्कृतशोधनेन नीरसप्रवर्ग्यमिदं मलरूपे परिणतं भवति। गणपतिप्राण एव अपानवायोः संसर्गं प्राप्यामुं मलाशयं प्रणयति। श्रोणीप्राणः पादइन्द्रियस्याधिष्ठानभूतः कथितः। अयं श्रोणीप्राण: सोमपूष्णोः समुत्पन्नः । एवञ्च सोमः पूषा चेत्युभावस्य देवतारौ।। अयमपि यमजप्राणः। द्विपदत्वान्मनुष्याणां श्रोणीप्राण: द्विधा विभज्यते दक्षिणश्रोणीप्राण: वामश्रोणीप्राणश्च । अनयो: दक्षिणश्रोणीप्राणः पूष्ण आयत्तो भवति वामश्रोणीप्राणश्च सोमायत्तो भवति। सोमो घनीभूतत्वस्य कारको भवति, अत एवायं मेदो घनीभूतं करोति । पूषा च तत्पोषणं करोति। अस्थ्नां परिपक्वतायां पुष्टौ चाप्यनयोरेव श्रोणीप्राणयोर्हेतुत्वमुक्तम्।

योषावृषाप्राणावपि उपस्थेन्द्रियस्याधारभूतौ उक्तौ । इमौ वृषणयोः स्थानापन्नौ भवतः । इमावप्यपानवायुसंसर्गं प्राप्य उपस्थेन्द्रियं सन्तानोत्पत्तियोग्यं कुरुतः। अनयोर्यो योषा प्राणः स योनिं वृषाप्राणस्याधानयोग्यां विदधाति । यश्च वृषाप्राणः स लिंगं शुक्रस्याधानयोग्यं विदधाति । शुक्रप्राण: मनस आधारभूतो भवति। मित्रार्चिषी अस्य देवतारौ स्तः। अनयोर्यो मित्रः स प्राणिशरीरे बलस्य आधानं करोति । तन्माध्यमेन चेच्छामूलकं कामं प्रवर्त्तयति। मूत्रवाहिन्यां नलिकायां मूत्रावरोधोऽप्यनेनैव क्रियते । यश्चार्चिः सः शुक्रं संगृह्य तस्य शुक्रवाहिन्यां नलिकायां सन्निरोधं करोति। एवमेते साकञ्जप्राणा: प्राणिशरीरेन्द्रियाणि सक्रियाणि कुर्वन्ति, येन प्राणिशरीरं सक्रियं भवति।